# Shri Shadvarnamantra Ashtakam

# શ્રીષડ્વર્ણમન્ત્રાષ્ટકમ્

## Document Information

Text title : Shri Shadvarnamantra Ashtakam 02 23 06 28

File name : ShaDvarNamantrAShTakam.itx

Category : shiva, aShTaka, mantra

Location : doc_shiva

Proofread by : Aruna Narayanan, Gopalakrishnan,NA

Description/comments : From stotrArNavaH 02-23 06-28

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 2, 2021

*sanskritdocuments.org*

# શ્રીષડ્વર્ણમન્ત્રાષ્ટકમ્

ધનુર્ધરિત્રીધરસાર્વભૌમો
    મૌર્વી ચ દર્વીકરસાર્વભૌમઃ ।
શરસ્તુ સર્વામરસાર્વભૌમઃ
    પાયાત્સ નો દૈવતસાર્વભૌમઃ ॥ ૧॥

વેદાન્તતત્ત્વમથિતં નવનીતસારં
    ચિદ્રૂપદૃક્પરમશૈવરહસ્યમન્ત્રમ્ ।
જ્યોતિર્મયોજ્જ્વલનિરઞ્જનરૂપમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૨॥

અશ્રાન્તદુષ્કૃતિસમુદ્રતરીશમન્ત્રં (અશ્રાન્તદુર્ભવ)
    પાપામ્બુરાશિબડવાનલતુલ્યમન્ત્રમ્ ।
બ્રહ્માચ્યુતેન્દ્રસુરમૌલિજપૈકમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૩॥

કામાદિવર્ગવિપિનપ્રલયાગ્નિમન્ત્રં
    દુર્દોષશૈલકુલિશાધિકભીમમન્ત્રમ્ ।
માયાન્ધકારપરિશોષિત (શોષણ) ભાનુમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૪॥

અષ્ટત્રયાષ્ટપુરવાયુવિકારકોશ- (અત્રષ્ટયાષ્ટ)
    ક્લેશાષ્ટપાશબહુદુઃખવિનાશમન્ત્રમ્ ।
દુશ્ચિત્તદુર્વ્યસનદામવિભેદમન્ત્રં (દુશ્ચિન્ત)
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૫॥

પઞ્ચપ્રસાદમહિતાક્ષરબીજમન્ત્રં
    મન્ત્રાગ્રગણ્યભુવનસ્તુતમન્ત્રરાજમ્ ।
સર્વોઽપિ મન્ત્રજનકપ્રણવાત્મમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૬॥

ઓઙ્કારબિન્દુસહિતાધિકશક્તિબીજં
    પઞ્ચાક્ષરત્રિતયવર્ણકમેકવર્ણમ્ ।
એકાદશાક્ષરસમન્વિતહંસમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૭॥

શ્રીસજ્જનાત્મબહિરન્તરવિત્કટાગ્ર (બહિરન્તરદીમિકૃદ્ર?)
    ક્ષ્માભાગગર્જિતનિરન્તરઘોષમન્ત્રમ્ ।
ષટ્ચક્રમણ્ડપવિહારવિશુદ્ધમન્ત્રં
    વન્દે ષડક્ષરિસદાશિવનામમન્ત્રમ્ ॥ ૮॥

ષડ્વર્ણમન્ત્રાષ્ટકમદ્ભુતાર્થં
    સર્વાગમપ્રોક્તજગત્પ્રકાશમ્ ।
યઃ સંપઠેન્મુક્તિસમસ્તભોગાન્
    પ્રાપ્નોતિ સત્યં સતિ સિદ્ધમન્ત્રમ્ ॥ ૯॥

॥ ઇતિ શ્રીષડ્વર્ણમન્ત્રાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan, Gopalakrishnan, NA

*Shri Shadvarnamantra Ashtakam*

pdf was typeset on September 2, 2021

Please send corrections to *sanskrit@cheerful.com*